# 2023

## SANSKRIT — GENERAL

**Paper : GE/CC-2**

**(Sanskrit Prose)**

**Full Marks : 65**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

**Section - A**

**Unit - I & II**

**(Marks : 30)**

1. अधोलिखितेषु ***दशानां*** प्रश्नानामुत्तरं **संस्कृतभाषया देवनागरीलिप्या च** लेख्यम्। 2×10

(a) कः शुकनासः? स कमुपदिष्टवान्?

(b) कः प्रतीहारानुपकरणसंभारसंग्रहार्थमादिदेश कथं वा?

(c) लक्ष्मीमदः कीदृशो भवति?

(d) "अतिगहनं तमो यौवनप्रभवम्"– कस्योक्तिरियम्? कथं यौवनप्रभवं तमोऽतिगहनं भवति?

(e) यौवनारम्भे कीदृशी बुद्धिः कालुष्यमुपयाति?

(f) लक्ष्मीः कस्मादेकान्तवक्रतां गृहीत्वेव क्षीरसागरात् उद्गता?

(g) "महतीयं खल्वनर्थपरम्परा"– अत्रोल्लिखिता अनर्थपरम्परा का?

(h) लक्ष्मीः किं न पश्यति? किञ्च न गणयति?

(i) राजानः केभ्यः कुप्यन्ति?

(j) मूर्खाः स्तुतिप्रियाः राजानः कान् अभिनन्दन्ति?

(k) केन कारणेन लक्ष्मीः असिधारासु निवसति?

(l) मूर्खा राजानः बृद्धजनोपदेशं किं मन्यन्ते?

(m) लक्ष्मीः कीदृशं पुरुषं खलीकरोति?

**2.** अधोलिखितयोः कस्यच***नैकस्य*** उत्तरं लेखनीयम्। 10×1

(a) शुकनासोपदेशमवलम्ब्य लक्ष्म्याश्चरित्रं वर्ण्यताम्।

(b) 'शुकनासोपदेशः' इति पाठ्यांशमवलम्ब्य बाणभट्टम्ब्य रचनाशैली विचार्यताम्।

**Section - B**

**Unit - II**

**(Marks : 20)**

**3.** यथेच्छं ***पञ्चानां*** प्रश्नानामुत्तरं देयम्। तेषु न्यूनतया ***द्वयोः*** उत्तरं **संस्कृतभाषया देवनागरीलिप्या च** लेखनीयम्। 2×5

(a) "किमपि नावलोकयामास चरणाक्षेपशब्दस्य" – अत्र अधोरेखाङ्कितपदस्य सन्धिविच्छेदं कुरु।

(b) शिवराजविजयः कीदृशं काव्यम्? अस्य विजयग्रन्थस्य नायकः कः?

(c) प्रोच्चं शीलापीठमारुह्य – रेखांकितपदे कस्य प्रत्ययस्य व्यवहारो भवति।

(d) वन्दीकृता इति पदं कथं सिध्यति?

(e) निरीक्ष्य इति पदं व्युत्पादयत।

(f) निर्मक्षिके इत्यस्य विग्रहवाक्यं प्रदाय विभक्तिर्निर्णेया।

(g) मन्दं व्याहार्षीत् – रेखांकितस्य कारकविभक्तिनिर्णयः करणीयः।

(h) मूर्तिमदिव कलियुगम् – रेखांकितपदस्य सविग्रहं समासं प्रदर्शयत।

**4.** कस्यचि***देकस्य*** व्याख्या कार्या **संस्कृतभाषया देवनागरीलिप्या च**। 5×1

(a) विजयतां शिववीरः, सिद्धन्तु भवतां मनोरथाः।

(b) कथं न भवेदीदृशः? कुलमेवेदृशं राजपुत्रदेशीयक्षत्रियाणाम्।

**5.** कस्यचि***देकस्य*** वङ्गभाषया अनुवादः करणीयः। 5×1

(a) वीर! गृहीतमखिलं वित्तम्, पराजिता आर्यसेनाः, वन्दीकृता वयम्, सञ्चितममलं यशः, इतोऽपि न शाम्यति ते क्रोधश्चेदस्मांस्ताड़य, मारय, छिन्धि, भिन्धि, पातय, मज्जय, खण्डय, कर्तय, ज्वालय; किन्तु त्यजेमामकिञ्चित्करीं जड़ां महादेवप्रतिमाम्।

(b) ततो दिल्लीश्वरं पृथ्वीराजं कान्यकुब्जेश्वरं जयचन्द्रं च पारस्परिकविरोधज्वरग्रस्तं विस्मृतराजनीतिं भारतवर्षदुर्भाग्यायमाणमाकलय्यानायासेनोभावपि विशस्य वाराणसीपर्यन्तमखण्डमण्डलमकष्टकमकीटकिट्टं महारत्नमिव महाराज्यमङ्गीचकार।

## Section - C

## Unit - II

**(Marks : 15)**

6. यथेच्छं ***विषयद्वयमादाय*** टीका लेखनीया। 5×2

   (a) वेतालपञ्चविंशतिका,

   (b) पञ्चतन्त्रम्,

   (c) हितोपदेशः।

7. यथेच्छं ***विषयमेकमवलम्ब्य*** टीका लेखनीया। 5×1

   (a) सिंहासनद्वात्रिंशिका,

   (b) पुरुषपरीक्षा।